॥ श्रीः ॥

# ॥ गोपालविंशतिः ॥

वन्दे बृन्दावनचरं वल्लवीजनवल्लभम् ।
जयन्तीसम्भवं धाम वैजयन्तीविभूषणम् ॥ १

वाचं निजाङ्कररसिकां प्रसमीक्षमाणो
वक्त्रारविन्दविनिवेशितपाञ्चजन्यः ।
वर्णत्रिकोणरुचिरे वरपुण्डरीके
बद्धासनो जयति वल्लवचक्रवर्ती ॥ २

आम्नायगन्धि रुदित स्फुरिताधरोष्ठ-
मास्राविलेक्षणमनुक्षणमन्दहासम् ।
गोपालडिम्भवपुषं कुहनाजनन्याः
प्राणस्तनन्धयमवैमि परं पुमांसम् ॥ ३

आविर्भवत्वनिभृताभरणं पुरस्ता-
दाकुञ्चितैकचरणं निभृतान्यपादम् ।
दध्ना निमन्थमुखरेण निबद्धतालं
नाथस्य नन्दभवने नवनीतनाट्यम् ॥ ४

हर्तुं कुम्भे विनिहितकरः स्वादुहैयङ्गवीनं
दृष्ट्वा दामग्रहणचटुलां मातरं जातरोषाम् ।
पायादीषत्प्रचलितपदो नापगच्छन्न तिष्ठन्
मिथ्यागोपः सपदि नयने मीलयन्विश्वगोप्ता ॥ ५

व्रजयोषिदपाङ्गवेदनीयं
मथुराभाग्यमनन्यभोग्यमीडे ।
वसुदेववधूस्तनन्धयं त-
त्किमपि ब्रह्म किशोरभावदृश्यम् ॥ ६

परिवर्तितकन्धरं भयेन
स्मितफुल्लाधरपल्लवं स्मरामि ।
विटपित्वनिरासकं कयोश्चि-
द्विपुलोलूखलकर्षकं कुमारम् ॥ ७

निकटेषु निशामयामि नित्यं
निगमान्तैरधुनापि मृग्यमाणम् ।
यमलार्जुनदृष्टबालकेलिं
यमुनासाक्षिकयौवनं युवानम् ॥ ८

पदवीमदवीयसीं विमुक्ते-
रटवीसम्पदमम्बुवाहयन्तीम् ।
अरुणाधरसाभिलाषवंशां
करुणां कारणमानुषीं भजामि ॥ ९

अनिमेषनिषेवनीयमक्ष्णो
रजहद्यौवनमाविरस्तु चित्ते ।
कलहायितकुन्तलं कलापैः
करणोन्मादकविभ्रमं महो मे ॥ १०

अनुयायिमनोज्ञवंशनालै-
रवतु स्पर्शितवल्लवीविमोहैः ।
अनखस्मितशीतलैरसौ मा-
मनुकम्पासरिदम्बुजैरपाङ्गैः ॥ ११

अधराहितचारुवंशनाला
    मकुटालम्बिमयूरपिञ्छमालाः ।
हरिनीलशिलाविभङ्गनीलाः
    प्रतिभाः सन्तु ममान्तिकप्रयाणे ।। १२

अखिलानवलोकयामि काला-
    न्महिलाधीनभुजान्तरस्य यूनः ।
अभिलाषपदं व्रजाङ्गनाना-
    मभिलापक्रमदूरमाभिरूप्यम् ।। १३

हृदि मुग्धशिखण्डमण्डनो
    लिखितः केन ममैष शिल्पिना ।
मदनातुरवल्लवाङ्गना-
    वदनाम्भोजदिवाकरो युवा ।। १४

महसे महिताय मौलिना
    विनतेनाञ्जलिमञ्जनत्विषे ।
कलयामि विमुग्धवल्लवी-
    वलयाभाषितमञ्जुवेणवे ।। १५

जयति ललितवृत्तिं शिक्षितो वल्लवीनां
    शिथिलवलयशिञ्जाशीतलैर्हस्ततालैः ।
अखिलभुवनरक्षागोपवेषस्य विष्णो-
    रधरमणिसुधायामंशवान्वंशनालः ।। १६

चित्राकल्पः श्रवसि कलयँल्लाङ्गलीकर्णपूरं
    बर्होत्तंसस्फुरितचिकुरो बन्धुजीवं दधानः ।
गुञ्जाबद्धामुरसि ललितां धारयन् हारयष्टिं
    गोपस्त्रीणां जयति कितवः कोऽपिकौमारहारी ।। १७

लीलायष्टिं करकिसलये दक्षिणे न्यस्य धन्या-
मंसे देव्याः पुलकरुचिरे संनिविष्टान्यबाहुः ।
मेघश्यामो जयति ललितो मेखलादत्तवेणु-
गुञ्जापीडस्फुरितचिकुरो गोपकन्याभुजङ्गः ॥ १८

प्रत्यालीढस्थितिमधिगतां प्राप्तगाढाङ्गपालिं
पश्चादीषन्मिलितनयनां प्रेयसीं प्रेक्षमाणः ।
भस्त्रायन्त्रप्रणिहितकरो भक्तजीवातुरव्यात्-
वारिक्रीडानिबिडवसनो वल्लवीवल्लभो नः ॥ १९

वासो हृत्वा दिनकरसुतासन्निधौ वल्लवीनां
लीलास्मेरो जयति ललितामास्थितः कुन्दशाखाम् ।
सव्रीडाभिस्तदनु वसने ताभिरभ्यर्थ्यमाने
कामी कश्चित्करकमलयोरञ्जलिं याचमानः ॥ २०

इत्यनन्यमनसा विनिर्मितां
वेङ्कटेशकविना स्तुतिं पठन् ।
दिव्यवेणुरसिकं समीक्षते
दैवतं किमपि यौवतप्रियम् ॥ २१

इति श्रीमद्वेङ्कटनाथस्य गोपालविंशतिः सम्पूर्णम् ॥